Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 3 | ISSN : 2581- 6306

# आचार्यरमाशङ्करमिश्रस्य सारस्वतपरिचयश्च

अमितोषमिश्रः
शोधच्छात्रः, साहित्यविभागः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,वाराणसी, उत्तरप्रदेशः

**Article Info**
Volume 5, Issue 3
Page Number : 165-166
**Publication Issue :**
May-June-2022
**Article History**
Accepted : 01 May 2022
Published : 30 May 2022

**शोधसारांशः-** आचार्यरमाशङ्करमिश्रस्य जन्म उत्तरप्रदेश राज्यस्य प्रतापगढ़जनपदे लालगंज-अझाराग्रामे मार्चमासस्य तृतीयदिनाङ्के 1948 ईसवीये जातम्। तस्य पितुः नाम आचार्यशिवप्रसादमिश्रः आसीत्। तेन प्रयागविश्वविद्यालयतः 1970तमे वर्षे प्रथमश्रेण्यां परास्नातकपरीक्षा समुत्तीर्णा, प्रथमश्रेण्याम् आचार्यपरीक्षा'समुत्तीर्णा। अनेन काव्यशास्त्रे शोधकार्यं कृत्वा'पीएचडी'इति उपाधिः प्राप्तः।

**मुख्यशब्दाः-** आचार्यरमाशङ्करमिश्रः, उपाधिः, समुत्तीर्णा, मारुतिचरितम्, ग्रन्थाः, काव्यम्।

आचार्यरमाशङ्करमिश्रस्य अग्रलिखिताः कृतयः सन्ति–

**1-करपात्रपूजाञ्जलिः**– सप्तसप्तत्यधिकमेकोनविंशतितमे वर्षे प्रकाशिता रचनेयं महर्षिकरपात्रि–जीवनमाश्रित्य वर्तते। काव्यमिदम् अखिलभारतीयरामराज्यपरिषत्–दुर्गाकुण्ड–वाराणसीतः प्रकाशितमभवत्। काव्ये अग्रलिखिताः विषयाः सन्ति – विनयः –कुसुमाञ्जलयः, प्रणामाञ्जलयः, श्रीपाणिपात्रो गुरुः, श्रीकरपात्राष्टकम्, श्रीकरपात्रावतारश्च।

**2-मारुतिचरितम्**–मारुतिचरिते खण्डद्वयं वर्तते समर्चनखण्डः समवतरणखण्डश्च। काव्यमिदं 1977तमे ख्रिष्टाब्दे अज्झारालालगंजप्रतापगढतः प्रकाशितं वर्तते। अत्र हनुमतः उपासना तस्य अवताराकथा च वर्णिता अस्ति।

**3-बाल्मीकीयरामायणे शाङ्करी व्याख्या**–ग्रन्थोऽयं शैलजाप्रकाशनतः अज्झारालालगंजप्रतापगढतः प्रकाशितोऽस्ति। अत्र बालकाण्डस्य प्रथमसर्गे सर्वाङ्गपूर्णा हिन्दी–व्याख्या अस्ति।

**4-मुनीश्वरमणिमालिका**–इयं रचना मुनीश्वरदत्ताभिनन्दनग्रन्थे 1981तमे वर्षे प्रकाशिता अभवत्।

**5-श्यामसौरभम्**–इयं रचना पं0श्यामशङ्करमिश्राभिनन्दनग्रन्थे वर्ष 2004तमे वर्षे प्रकाशिता अभवत्।

**6-आवन्तिकम्**–आवन्तिकखण्डकाव्ये भागद्वयं विद्यते 1 वन्दितम् 2 नन्दितम्। अत्र महाकालनगर्याः अवन्तिकायाः सौन्दर्यं वैभवश्च वर्णितोऽस्ति। काव्यमिदं शैलजाप्रकाशनतः अझारालालगंजप्रतापगढ़तः प्रकाशितमभवत्।

**7-चिन्तनश्रीः**(संस्कृतनिबन्धः)–सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतः 2009तमे ख्रिष्टाब्दे प्रकाशिता अभवत्। अत्र अष्टचत्वारिंशत् विषयान् आश्रित्य निबन्धाः लिखिताः सन्ति।

**8-चिन्तनश्रीः**(हिन्दी–निबन्धः)

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**9-कल्लोलिनी**( संस्कृतकवितासंग्रहः अप्रकाशितः )

**10-विवेकचम्पूः**( स्वामिविवेकानन्दजीवनाधारितं चम्पूकाव्यम् अप्रकाशितम्)

**11-ध्वन्यात्ममीमांसा**–काव्यशास्त्रीयः गन्थोऽयं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्रकाशनविभागतः 2007तमे ख्रिष्टाब्दे प्रकाशितोऽभवत्। अत्र दश विमर्शाः सन्ति यथा 1 किन्नाम काव्यशास्त्रम् 2 काव्यशास्त्रस्य समुद्भवो विकासश्च 3 काव्यशास्त्रप्रसाधनं कालविभाजनञ्च 4 काव्यशास्त्रीयप्रस्थानेषु ध्वनेर्मूल्यांकनम् 5 वृत्तिविवेचना व्यञ्जना–प्रतिष्ठापना 6 पाश्चात्यानां काव्यशास्त्रपरं चिन्तनं व्यञ्जना च 7 ध्वनिपरिशीलनम् 8 ध्वनिकारपूर्वपरवर्तिध्वनिप्रभावः 9 ध्वनिकारस्य व्यक्तित्वं कृतित्वञ्च 10 ध्वनिविरोधिनः तन्मननिरसनं ध्वनिप्रतिष्ठापना च।

**12-इन्दिरा-वैभवम्**– भारत–प्रधानमन्त्री–श्रीमती–इन्द्रिरागान्धिनः जीवनमाश्रित्य संस्कृतकाव्यम्।

**13-चिन्तनसौवर्णिकम्**–लेखसङ्ग्रहोऽयं 2009तमे ख्रिष्टाब्दे सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्रकाशनविभागतः प्रकाशितोऽस्ति। अत्र विषयाः सन्ति–1 काव्यसाहित्ययोर्विवेकः 2 कालिदास–राजशेखरसम्मतः काव्यविमर्शः 3 साहित्यशास्त्रस्य लोकोपकारकत्वम् 4 काव्यकरणपर्यालोचनम् 5 काव्यशास्त्रप्रयोजनविमर्शः 6 अभिधापरिशीलनम् 7 लक्षणा–वैलक्षणी 8 व्यञ्जना–व्यञ्जनम् 9 व्यञ्जनाऽभिव्यञ्जनयोस्तुलनात्मकं समीक्षणम् 10 काव्यं ध्वनिश्च 11 ध्वनितत्त्वविमर्शः 12 ध्वनेः काव्यात्मता (काव्यस्यात्मा ध्वनिः) 13 स्फोट–ध्वनि–सम्बन्ध–समीक्षा 14 आनन्दवर्धनोत्तरवर्तिनो ध्वनिविरोधिनः 15 ध्वनिविरोधस्य पुनर्मूल्यांकनम् 16 ध्वनिकारात् प्राग् ध्वनिध्वननम् 17 संस्कृत–काव्यशास्त्रे भक्तिरस–सूत्रपातः 18 भक्तिरस–प्रतिष्ठापना–मीमांसा 19 अलङ्कार–तत्त्व–विवेकः 20 चमत्कार–प्रस्थानम् 21 पण्डितराजोत्तर–संस्कृत–काव्यशास्त्रविकासधारायां वाराणस्याः योगदानम्। 22 कालिदासस्य भारतीयता–परिज्ञानम् 23 उपमा कालिदासस्य 24 बाणभट्टस्य शाब्दीक्रीड़ा 25 जगद्गुरु–महाकवि–रामभद्राचार्यप्रणीते भार्गवराघवीयमहाकाव्ये रसपरिशीलनम् 26 विंशशताब्दीया उत्तरप्रदेशीयाः संस्कृतकवयः 27 कवयितॄणां योगदानम् 28 पुराणवाङ्मये भक्तिः 29 श्रीमद्भागवतस्य दशमस्कन्धे श्रीकृष्णबाललीला 30 ब्रह्मपुराणे शिवतत्त्वमीमांसा 31 रामायणे प्रतिपादितं लोकजीवनम् 32 महाभारतं विश्वज्ञानकोशात्मकं ग्रन्थरत्नम् 33 संस्कृतसाहित्ये नैमिषारण्यचित्रणम् 34 प्रयागः(प्रयागदण्डकः) 35 भारतः (भारतदण्डकम्) 36 धर्मरक्षणविचक्षणाः धर्मसम्राट्करपात्रस्वामिनः 37 विविधशास्त्रपारदृश्वा आचार्यविश्वेश्वर–पाण्डेयः 38 साहित्यसाधकः पण्डितकमलापतित्रिपाठी 39 संस्कृतवाङ्मये आध्यात्मिकचिन्तनम् 40 भज गोविन्दम् 41 नास्ति तत्त्वं गुरोः परम् 42 संस्कृतस्य प्राच्यभाषावाङ्मये दशा दिशा च 43 परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम् 44 परीक्ष्यकारिणो हि कुशला भवन्ति 45 अविवेकः परमापदां पदम् 46 प्रारब्ध–पुरुषार्थयोर्विवेकः 47 संस्कृतवाङ्मये नारीणां वैशिष्ट्यम् 48 प्रवीरस्य सौभाग्यम्।

सन्दर्भाः–

1–श्रीकरपात्रपूजाञ्जलिः, वर्षम्–1977, प्रकाशनम्–अखिलभारतीयरामराज्यपरिषत् दुर्गाकुण्डम् वाराणसी।

2–मारुतिचरितम्, वर्षम् 1977, प्रकाशनम्–अज्झारा लालगंज, प्रतापगढ़जनपदम्।

3–आवन्तिकम्, वर्षम् 1976, प्रकाशनम्–शैलजाप्रकाशनं अज्झारा लालगंज, प्रतापगढ़जनपदम्।

4–चिन्तनश्रीः, वर्षम्–2009, प्रकाशनम्–प्रकाशनविभागः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी।